# ॥ શ્રીધૂમાવતીહૃદયમ્ ॥

.. Shri dhumavati Hridayam ..

sanskritdocuments.org

August 20, 2017

# .. Shri dhumavati Hridayam ..

# ॥ શ્રીધૂમાવતીહૃદયમ્ ॥

## Sanskrit Document Information

Text title : dhUmAvatIhRidayam

File name : dhUmAvatIhRidayam.itx

Category : hRidaya, devii, dashamahAvidyA

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Description-comments : In shAktapramoda and mantramahArNava madhyakhaNda

Latest update : March 29, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીધૂમાવતીહૃદયમ્ ॥

શ્રીગણેશાય નમઃ ॥

શ્રીઉમામહેશ્વરાભ્યાં નમઃ ॥

શ્રીધૂમાવત્યૈ નમઃ ॥

ૐ અસ્ય શ્રીધૂમાવતીહૃદયસ્તોત્રમન્ત્રસ્ય પિપ્પલાદ ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । શ્રીધૂમાવતી દેવતા । ધૂં બીજમ્ । હ્રીં શક્તિઃ ।
ક્લીં કીલકમ્ । સર્વશત્રુસંહરણે પાઠે વિનિયોગઃ ॥

અથ હૃદયાદિ ષડઙ્ગન્યાસઃ ।
ૐ ધાં હૃદયાય નમઃ ।
ૐ ધીં શિરસે સ્વાહા ।
ૐ ધૂં શિખાયૈ વષટ્ ।
ૐ ધૈં કવચાય હુમ્ ।
ૐ ધૌં નેત્રત્રયાય વૌષટ્ ।
ૐ ધઃ અસ્ત્રાય ફટ્ ।
ઇતિ હૃદયાદિ ષડઙ્ગન્યાસઃ ॥

અથ કરન્યાસઃ ।
ૐ ધાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ ધીં તર્જનીભ્યાં નમઃ ।
ૐ ધૂં મધ્યમાભ્યાં નમઃ ।
ૐ ધૈં અનામિકાભ્યાં નમઃ ।
ૐ ધૌં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ ધઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
ઇતિ કરન્યાસઃ ॥

અથ ધ્યાનમ્ ।
ૐ ધૂમ્રાભાં ધૂમ્રવસ્ત્રાં પ્રકટિતદશનાં મુક્તવાલામ્બરાઢ્યાં
કાકાઙ્કસ્યન્દનસ્થાં ધવલકરયુગાં શૂર્પહસ્તાતિરૂક્ષામ્ ।
નિત્યં ક્ષુત્ક્ષાન્તદેહાં મુહુરતિકુટિલાં વારિવાઞ્છાવિચિત્રાં
ધ્યાયેદ્ધૂમાવતીં વામનયનયુગલાં ભીતિદાં ભીષણાસ્યામ્ ॥ ૧॥

ઇતિ ધ્યાનમ્ ।

કલ્પાદૌ યા કાલિકાદ્યાઽચીકલન્મધુકૈટભૌ ।
કલ્પાન્તે ત્રિજગત્સર્વં ધૂમાવતીં ભજામિ તામ્ ॥ ૨॥

ગુણાગારાઽગમ્યગુણા યા ગુણા ગુણવર્દ્ધિની ।
ગીતાવેદાર્થતત્ત્વજ્ઞૈર્ધૂમાવતીં ભજામિ તામ્ ॥ ૩॥

ખટ્વાઙ્ગધારિણી ખર્વા ખણ્ડિની ખલરક્ષસામ્ ।
ધારિણી ખેટકસ્યાપિ ધૂમાવતીં ભજામિ તામ્ ॥ ૪॥

ઘૂર્ણા ઘૂર્ણકરા ઘોરા ઘૂર્ણિતાક્ષી ઘનસ્વના ।
ઘાતિની ઘાતકાનાં યા ધૂમાવતીં ભજામિ તામ્ ॥ ૫॥

ચર્વન્તીમસ્થિખણ્ડાનાં ચણ્ડમુણ્ડવિદારિણીમ્ ।
ચણ્ડાટ્ટહાસિનીં દેવીં ભજે ધૂમાવતીમહમ્ ॥ ૬॥

છિન્નગ્રીવાં ક્ષતાચ્છન્નાં છિન્નમસ્તાસ્વરૂપિણીમ્ ।
છેદિનીં દુષ્ટસઙ્ઘાનાં ભજે ધૂમાવતીમહમ્ ॥ ૭॥

જાતા યા યાચિતા દેવૈરસુરણાં વિઘાતિની ।
જલ્પન્તી બહુ ગર્જન્તી ભજે તાં ધૂમ્રરૂપિણીમ્ ॥ ૮॥

ઝઙ્કારકારિણીં ઝઞ્ઝાં ઝઞ્ઝમાઝમવાદિનીમ્ ।
ઝટિત્યાકર્ષિણીં દેવીં ભજે ધૂમાવતીમહમ્ ॥ ૯॥

ટીપટઙ્કારસંયુક્તાં ધનુષ્ટઙ્કારકારિણીમ્ ।
ઘોરાં ઘનઘટાટોપાં વન્દે ધૂમાવતીમહમ્ ॥ ૧૦॥

ઠં ઠં ઠં ઠં મનુપ્રીતિં ઠઃ ઠઃ મન્ત્રસ્વરૂપિણીમ્ ।
ઠમકાહ્વગતિપ્રીતાં ભજે ધૂમાવતીમહમ્ ॥ ૧૧॥

ડમરૂડિણ્ડિમારાવાં ડાકિનીગણમણ્ડિતામ્ ।
ડાકિનીભોગસન્તુષ્ટાં ભજે ધૂમાવતીમહમ્ ॥ ૧૨॥

ઢક્કાનાદેન સન્તુષ્ટાં ઢક્કાવાદકસિદ્ધિદામ્ ।
ઢક્કાવાદચલચ્ચિત્તાં ભજે ધૂમાવતીમહમ્ ॥ ૧૩॥

તત્ત્વવાર્ત્તાપ્રિયપ્રાણાં ભવપાથોધિતારિણીમ્ ।
તારસ્વરૂપિણીં તારાં ભજે ધૂમાવતીમહમ્ ॥ ૧૪॥

થાં થીં થૂં થેં મન્ત્રરૂપાં થૈં થૌં થં થઃ સ્વરૂપિણીમ્ ।
થકારવર્ણસર્વસ્વાં ભજે ધૂમાવતીમહમ્ ॥ ૧૫॥

દૂર્ગાસ્વરૂપિણીં દેવીં દુષ્ટદાનવદારિણીમ્ ।
દેવદૈત્યકૃતધ્વંસાં વન્દે ધૂમાવતીમહમ્ ॥ ૧૬॥

ધ્વાન્તાકારાન્ધકધ્વંસાં મુક્તધમ્મિલ્લધારિણીમ્ ।
ધૂમધારાપ્રભાં ધીરાં ભજે ધૂમાવતીમહમ્ ॥ ૧૭॥

નર્ત્તકીનટનપ્રીતાં નાટ્યકર્મવિવર્દ્ધિનીમ્ ।
નારસિંહીન્નરારાધ્યાં નૌમિ ધૂમાવતીમહમ્ ॥ ૧૮॥

પાર્વતીપતિસમ્પૂજ્યાં પર્વતોપરિવાસિનીમ્ ।
પદ્મારૂપાં પદ્મપૂજ્યાં નૌમિ ધૂમાવતીમહમ્ ॥ ૧૯॥

ફૂત્કારસહિતશ્વાસાં ફટ્ મન્ત્રફલદાયિનીમ્ ।
ફેત્કારિગણસંસેવ્યાં સેવે ધૂમાવતીમહમ્ ॥ ૨૦॥

બલિપૂજ્યાં બલારાધ્યાં બગલારૂપિણીં વરામ્ ।
બ્રહ્માદિવન્દિતાં વિદ્યાં વન્દે ધૂમાવતીમહમ્ ॥ ૨૧॥

ભવ્યરૂપાં ભવારાધ્યાં ભુવનેશીસ્વરૂપિણીમ્ ।
ભક્તભવ્યપ્રદાન્દેવીં ભજે ધૂમાવતીમહમ્ ॥ ૨૨॥

માયાં મધુમતીં માન્યાં મકરધ્વજમાનિતામ્ ।
મત્સ્યમાંસમદાસ્વાદાં મન્યે ધૂમાવતીમહમ્ ॥ ૨૩॥

યોગયજ્ઞપ્રસન્નાસ્યાં યોગિનીપરિસેવિતામ્ ।
યશોદાં યજ્ઞફલદાં યજે ધૂમાવતીમહમ્ ॥ ૨૪॥

રામારાધ્યપદદ્વન્દ્વાં રાવણધ્વંસકારિણીમ્ ।
રમેશરમણીં પૂજ્યામહં ધૂમાવતીં શ્રયે ॥ ૨૫॥

લક્ષલીલાકલાલક્ષ્યાં લોકવન્દ્યપદામ્બુજામ્ ।
લમ્બિતાં બીજકોશાઢ્યાં વન્દે ધૂમાવતીમહમ્ ॥ ૨૬॥

બકપૂજ્યપદામ્ભોજાં બકધ્યાનપરાયણામ્ ।
બાલાં બકારિસન્ધ્યેયાં વન્દે ધૂમાવતીમહમ્ ॥ ૨૭॥

શાઙ્કરીં શઙ્કરપ્રાણાં સઙ્કટધ્વંસકારિણીમ્ ।

શત્રુસંહારિણીં શુદ્ધાં શ્રયે ધૂમાવતીમહમ્ ॥ ૨૮॥

ષડાનનારિસંહન્ત્રીં ષોડશીરૂપધારિણીમ્ ।
ષડ્રસાસ્વાદિનીં સૌમ્યાં સેવે ધૂમાવતીમહમ્ ॥ ૨૯॥

સુરસેવિતપાદાબ્જાં સુરસૌખ્યપ્રદાયિનીમ્ ।
સુન્દરીગણસંસેવ્યાં સેવે ધૂમાવતીમહમ્ ॥ ૩૦॥

હેરમ્બજનનીં યોગ્યાં હાસ્યલાસ્યવિહારિણીમ્ ।
હારિણીં શત્રુસઙ્ઘાનાં સેવે ધૂમાવતીમહમ્ ॥ ૩૧॥

ક્ષીરોદતીરસંવાસાં ક્ષીરપાનપ્રહર્ષિતામ્ ।
ક્ષણદેશેજ્યપાદાબ્જાં સેવે ધૂમાવતીમહમ્ ॥ ૩૨॥

ચતુસ્ત્રિંશદ્વર્ણકાનાં પ્રતિવર્ણાદિનામભિઃ ।
કૃતં તુ હૃદયસ્તોત્રં ધૂમાવત્યાં સુસિદ્ધિદમ્ ॥ ૩૩॥

ય ઇદં પઠતિ સ્તોત્રં પવિત્રં પાપનાશનમ્ ।
સ પ્રાપ્નોતિ પરાં સિદ્ધિં ધૂમાવત્યાઃ પ્રસાદતઃ ॥ ૩૪॥

પઠન્નેકાગ્રચિત્તો યો યદ્યદિચ્છતિ માનવઃ ।
તત્સર્વં સમવાપ્નોતિ સત્યં સત્યં વદામ્યહમ્ ॥ ૩૫॥

ઇતિ ધૂમાવતીહૃદયં સમાપ્તમ્ ॥

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

.. Shri dhumavati Hridayam ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*